শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে পঞ্চপঞ্চাশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে পঞ্চপঞ্চাশং দশকম্॥

## কালিযমর্দনে ভগৱন্নর্তনৱর্ণনম্

অথ ৱারিণি ঘোরতরং ফণিনং
প্রতিৱারযিতুং কৃতধীর্ভগৱন্।
দ্রুতমারিথ তীরগনীপতরুং
ৱিষমারুতশোষিতপর্ণচযম্॥ **55.1** ॥

অধিরুহ্য পদাম্বুরুহেণ চ তং
নৱপল্লৱতুল্যমনোজ্ঞরুচা।
হ্রদৱারিণি দূরতরং ন্যপতঃ
পরিঘূর্ণিতঘোরতরঙ্গগণে॥ **55.2** ॥

ভুৱনত্রযভারভৃতো ভৱতো
গুরুভারৱিকম্পিৱিজৃম্ভিজলা।
পরিমজ্জযতি স্ম ধনুশ্শতকং
তটিনী ঝটিতি স্ফুটঘোষৱতী॥ **55.3** ॥

অথ দিক্ষু ৱিদিক্ষু পরিক্ষুভিত -
ভ্রমিতোদরৱারিনিনাদভরৈঃ।
উদকাদুদগাদুরগাধিপতি -
স্ত্বদুপান্তমশান্তরুষাঽন্ধমনাঃ॥ **55.4** ॥

ফণশৃঙ্গসহস্রৱিনিস্সৃমর -
জ্ৱলদগ্নিকণোগ্রৱিষাম্বুধরম্।

পুরতঃ ফণিনং সমলোকযথা
    বহুশৃঙ্গিণমঞ্জনশৈলমিৱ ॥ **55.5** ॥

জ্ৱলদক্ষি পরিক্ষরদুগ্রৱিষ -
    শ্ৱসনোষ্মভরঃ স মহাভুজগঃ।
পরিদশ্য ভৱন্তমনন্তবলং
    পরিৱেষ্টযদস্ফুটচেষ্টমহো ॥ **55.6** ॥

অৱিলোক্য ভৱন্তমথাকুলিতে
    তটগামিনি বালকধেনুগণে।
ৱ্রজগেহতলেঽপ্যনিমিত্তশতং
    সমুদীক্ষ্য গতা যমুনাং পশুপাঃ ॥ **55.7** ॥

অখিলেষু ৱিভো ভৱদীযদশা -
    মৱলোক্য জিহাসুষু জীৱভরম্।
ফণিবন্ধনমাশু ৱিমুচ্য জৱা -
    দুদগম্যত হাসজুষা ভৱতা ॥ **55.8** ॥

অধিরুহ্য ততঃ ফণিরাজফণান্
    ননৃতে ভৱতা মৃদুপাদরুচা।
কলশিঞ্জিতনূপুরমঞ্জুমিল -
    ৎকরকঙ্কণসঙ্কুলসঙ্ক্বণিতম্ ॥ **55.9** ॥

জহৃষুঃ পশুপাস্তুতুষুর্মুনযো
    ৱৱৃষুঃ কুসুমানি সুরেন্দ্রগণাঃ।
ৎৱযি নৃত্যতি মারুতগেহপতে
    পরিপাহি স মাং ৎৱমদান্তগদাৎ ॥ **55.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে পঞ্চপঞ্চাশং দশকং সমাপ্তম্ ॥